कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M2243 विषय धर्मशास्त्र

नाव शांतिपाठ (मुद्रित)

लेखक / लिपीकार —

पृठ 08 काळ — पूर्ण / ~~अपूर्ण~~

Checked 2012

सुरश्रेष्ठस्वस्थानेपरमेश्वर ॥ यत्रब्रह्मादयोदेवास्तत्रगच्छहुताशन ॥ यथाशक्तिब्राह्मणान्भोजयेत् ॥ भूयसींच संकल्प्य ॥ इतिउत्सर्जनउपाकर्मप्रयोगः ॥ ९१ ॥ शांतिपाठः ॥ श्रीगणेशायनमः ॥ यस्यवाक्यंसऋषिर्यातेनोच्यतेसादेवतायदक्षरपरिमाणंतच्छंदः सर्वारिष्टशांतिपूर्वकं सूतिकाबालकयोःआयुष्याभिवृद्ध्यर्थंशांतिसूक्तानिरात्रिसूक्तानिपठणेविनियोगः ॥ ॐ आनो॑भ॒द्राःक्रत॑वोयंतु॒वि॒श्वतो॒द॑ब्धासो॒अप॑रीतासउ॒द्भिदः॑ ॥ दे॒वानो॒यथा॒सद॒मिद्वृधेअस॒न्नप्रा॑युवोरक्षि॒तारो॑दि॒वेदि॑वे ॥ दे॒वानां॑भ॒द्रासु॑म॒तिर्ऋ॑जुय॒तांदे॒वानां॑रा॒तिर॒भिनो॒निव॑र्ततां ॥ दे॒वानां॑स॒ख्यमुप॑सेदिमाव॒यंदे॒वान॒आयुः॒प्रति॑रंतु॒जी॒वसे॑ ॥ तान्पूर्वं॑यानि॒विदा॑हूमहेव॒यंभगं॑मि॒त्रमादि॑तिं॒दक्षं॑म॒स्रिधं॑ ॥ अ॒र्य॒मणं॒वरु॑णं॒सोम॑म॒श्विना॒सर॑स्वतीनःसुभा॒गामय॑स्करत् ॥ तन्नो॒वातो॑मयोभुवातुभेष॒जंतन्मा॒तापृ॑थि॒वीतत्पि॒ताद्यौः॑ ॥ तत्ग्रावा॑णःसोम॒सुतो॑मयो॒भुव॒-

स्तदश्विनाशृणुतंधिष्ण्यामुवं ॥ तामीशानंजगतस्तस्थुषस्पतिंधियंजिन्व-
मवसेहूमहेवयं ॥ पूषानोयथावेदसामसद्वृधेरक्षितापायुरदब्धःस्वस्तये ॥ १
स्वस्तिनइंद्रोवृद्धश्रवास्वस्तिनःपूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योअरि-
ष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातु ॥ पृषदश्वामरुतःपृश्निमातरःशुभंयावा
नोविदथेषुजग्मयः ॥ अग्निजिह्वामनवःसुरचक्षसोविश्वेनोदेवाऽअवसागम
न्निह ॥ भद्रंकर्णेभिःशृणुयामदेवाभद्रंपश्येमाक्षभिर्यजत्राः ॥ स्थिरैरंगैस्तु
ष्टुवांसस्तनूभिर्व्यशेमदेवहितंयदायुः ॥ शतमिन्नुशरदोअंतिदेवायत्रानश्च
क्राजरसंतनूनां ॥ पुत्रासोयत्रपितरोभवंतिमानोमध्यारीरिषतायुर्गंतोः ॥अ-
दितिर्द्यौरदितिरंतरिक्षमदितिर्मातासपितासपुत्रः ॥ विश्वेदेवाअदितिःपंच
जनाअदितिर्जातमदितिर्जनित्वं ॥ २ ॥ स्वस्तिनोमिमीतामश्विनाभगःस्व-
स्तिदेव्यदितिरनर्वणः ॥ स्वस्तिपूषाअसुरोदधातुनःस्वस्तिद्यावापृथिवी-
सुचेतुना ॥ स्वस्तयेवायुमुपब्रवामहैसोमंस्वस्तिभुवनस्ययस्पतिः ॥ बृह-
स्पतिंसर्वगणंस्वस्तयेस्वस्तयआदित्यासोभवंतुनः ॥ विश्वेदेवानोअद्या-
स्वस्तयेवैश्वानरोवसुरग्निःस्वस्तये ॥ देवाअवंत्वृभवःस्वस्तयेस्वस्तिनोरु-
द्रःपात्वंहसः ॥ स्वस्तिमित्रावरुणास्वस्तिपथ्येरेवति ॥ स्वस्तिनइंद्रश्चा-
ग्निश्चस्वस्तिनोअदितेकृधि ॥ स्वस्तिपंथामनुचरेमसूर्याचंद्रमसाविव ॥
पुनर्ददताघ्नताजानतासंगमेमहि ॥ ३ ॥ स्वस्त्ययनंतार्क्ष्यमरिष्टनेमिंमह-
द्भूतंवायसंदेवतानां ॥ असुरघ्नमिंद्रसखंसमत्सुबृहद्यशोनावमिवारुहेम ॥
अंहोमुचमांगिरसंगयंचस्वस्त्यात्रेयंमनसाचतार्क्ष्यं ॥ प्रयंतपाणिःशरणं-
प्रपद्येस्वस्तिसंबाधेष्वभयन्नोअस्तु ॥ ४ ॥ शन्नइंद्राग्नीभवतामवोभिःशन्न
इंद्रावरुणारातहव्या ॥ शमिंद्रासोमासुवितायशंयोःशन्नइंद्रापूषणावाजसा-
तौ ॥ शन्नोभगःशमुनःशंसोअस्तुशन्नःपुरंधिःशमुसंतुरायः ॥ शन्नःसत्य-

स्यसुयमस्यशंसःशंनोअर्यमापुरुजातोअस्तु ॥ शन्नोधाताशमुधर्त्तानोअ-
स्तुशन्नउरूचीभवतुस्वधाभिः ॥ शंरोदसीबृहतीशन्नोअद्रिःशन्नोदेवानां-
सुहवानिसंतु ॥ शन्नोअग्निर्ज्योतिरनीकोअस्तुशन्नोमित्रावरुणावश्विनाशं ॥
शन्नःसुकृतांसुकृतानिसंतुशन्नइषिरोअभिवातुवातः ॥ शन्नोद्यावापृथिवीपू-
र्वहुतौशमंतरिक्षंदृशयेनोअस्तु ॥ शन्नओषधीर्वनिनोभवंतुशन्नोरजसस्प-
तिरस्तुजिष्णुः ॥ ५ ॥ शन्नइंद्रोवसुभिर्देवोअस्तुशमादित्येभिर्वरुणःसुशं-
सः ॥ शन्नोरुद्रोरुद्रेभिर्जलाषःशन्नस्त्वष्टाग्नाभिरिहशृणोतु ॥ शन्नःसोमो-
भवतुब्रम्हशन्नःशन्नोग्रावाणःशमुसंतुयज्ञाः ॥ शन्नःस्वरूणांमितयोभवं-
तुशन्नःप्रस्वः२शम्वस्तुवेदिः ॥ शन्नःसूर्यउरुचक्षाउदेतुशन्नश्चतस्रःप्रदि-
शोभतु ॥ शन्नःपर्वताध्रुवयोभवंतुशन्नःसिंधवःशमुसंत्वापः ॥ शन्नोअदि-
तिर्भवतुव्रतेभिःशन्नोभवंतुमरुतःस्वर्काः ॥ शन्नोविष्णुःशमुपूषानोअस्तुशं-

नोभवित्रंशम्वस्तुवायुः ॥ शन्नोदेवःसवितात्रायमाणःशन्नोभवंतूषसोवि-
भातीः ॥ शन्नःपर्जन्योभवतुप्रजाभ्यःशन्नःक्षेत्रस्यपतिरस्तुशंभुः ॥ ६ ॥ श-
न्नोदेवाविश्वदेवाभवंतुशंसरस्वतीसहधीभिरस्तु ॥ शमभिषाचःशमुराति-
षाचःशन्नोदिव्याःपार्थिवाःशन्नोआप्याः ॥ शन्नःसत्यस्यपतयोभवंतुशन्नो-
अर्वंतःशमुसंतुगावः ॥ शन्नऋभवःसुकृतःसुहस्ताःशन्नोभवंतुपितरोहवेषु
॥ शन्नोअजएकपाद्देवोअस्तुशन्नोहिर्बुध्न्य१शंसमुद्रः ॥ शन्नोअपांनपात्पे-
रुरस्तुशन्नःपृश्निर्भवतुदेवगोपा ॥ आदित्यारुद्रावसवोजुषंतेदंब्रह्मक्रिय-
माणंनवीयः ॥ शृण्वंतुनोदिव्याःपार्थिवासोगोजाताउतयेयज्ञियासः ॥ ये-
देवानांयज्ञियायज्ञियानांमनोर्यजत्राअमृताऋतज्ञाः ॥ तेनोरासंतामुरुगाय
मद्ययूयंपातस्वस्तिभिःसदानः ॥ ७ ॥ शंवतीःपारयंत्येतेतंपृच्छंतिवचो-
युजा ॥ अभ्यारंतयमाकेतुंयएवेदमितिब्रवन् ॥ भसाकेतुंपरिस्रुतंभारती-

ब्रम्हवर्धनीः ॥ संजानानामहीमातायएवेदमितिब्रवंत् ॥ इंद्रस्तांकींविभुंप्रभुभानुनेयंसरस्वतीं ॥ येनंसूर्यंमरीचयंयेनेमेरोदसीउभे ॥ जुषस्वाग्नेअंगिरःकाण्वंमेध्यातिथिं ॥ मात्वासोमस्यबर्हत्सुतस्यमधुमत्तमः ॥ त्वमग्नेअंगिरःशोचस्वदेववीतमः ॥ आशंतमशंतमाभिराभिष्टिभिःशांतिस्वस्तिमकुर्वत ॥ शंनःकनिक्रदद्देवःपर्जन्योअभिवर्षतु ॥ शंनोद्यावापृथिवीशंप्रजाभ्यःशंनएधिद्विपदेशंचतुष्पदे ॥ ८ ॥ यतंइंद्रभयामहेततोनोअभयंकृधि ॥ मघवंछग्धितवतन्नऊतिभिर्विद्विषोविमृधोजहि ॥ त्वंहिराधस्पतेराधसोमहःक्षयस्यासिविधतः ॥ तंत्वावयंमघवान्निंद्रगिर्वणःसुतावंतोहवामहे ॥ इंद्रस्पळुतवृत्रहापरस्पानोवरेण्यः ॥ सनोरक्षिषच्चरमंसमध्यमंसपश्चात्पातुनःपुरः ॥ ९ ॥ त्वंनःपश्चादधरादुत्तरात्पुरइंद्रनिपाहिविश्वतः ॥ आरेअस्मत्कृणुहिदैव्यंभयमारेहेतीरदेवीः ॥ अद्याद्याश्वश्वइंद्रत्रास्वपरेचनः ॥ विश्वाचनोजरितृन्त्सत्पतेअहादिवानक्तंचरक्षिषः ॥ प्रभंगीशूरोमघवातुवीमघःसमिंश्लोवीर्यायकं ॥ उभातेबाहुवृषणाशतक्रतोनियावज्रंमिमिक्षतुः ॥ १० ॥ भद्रंनोअपिवातयमनः ॥ आशुःशिशानोवृषभोनभीमोघनाघनःक्षोभणश्चर्षणीनां ॥ संक्रंदनोनिमिषएकवीरःशतंसेनाअजयत्साकमिंद्रः ॥ संक्रंदनेनानिमिषेणजिष्णुनायुत्कारेणदुश्च्यवनेनधृष्णुना ॥ तदिंद्रेणजयततत्सहध्वंयुधोनरइषुहस्तेनवृष्णा ॥ सइषुहस्तैःसनिषंगिभिर्वशीसंस्रष्टासयुधइंद्रोगणेन ॥ संसृष्टजित्सोमपाबाहुशर्ध्यूग्रधन्वाप्रतिहिताभिरस्ता ॥ बृहस्पतेपरिदीयारथेनरक्षोहामित्राँऽअपबाधमानः ॥ प्रभंजन्त्सेनाःप्रमृणोयुधाजयन्नस्माकमेध्यवितारथानां ॥ बलविज्ञायस्थविरःप्रवीरःसहस्वान्वाजीसहमानउग्रः ॥ अभिवीरोअभिसत्वासहोजाजैत्रमिंद्ररथमातिष्ठगोवित् ॥ गोत्रभिदंगोविदंवज्रबाहुंजयंतमज्मप्रमृणंतमोजसा ॥ इमंसजाताअनुवी

रयध्वमिंद्रंसखायोअनुसंरभध्वं ॥ ११ ॥ अभिगोत्राणिसहसागाहमानोदयोवीरःशतमन्युरिंद्रः ॥ दुश्च्यवनःपृतनाषाळ्युध्यो ऽस्माकंसेनाअवतुप्रयुत्सु ॥ इंद्रआसांनेताबृहस्पतिर्दक्षिणायज्ञःपुरएतुसोमः ॥ देवसेनानामभिभंजतीनांजयंतीनांमरुतोयंत्वग्रं ॥ इंद्रस्यवृष्णोवरुणस्यराज्ञआदित्यानांमरुतांशर्धउग्रं ॥ महामनसांभुवनच्यवानांघोषोदेवानांजयतामुदस्थात् ॥ उद्धर्षयमघवन्नायुधान्युत्सत्वनांमामकानांमनांसि ॥ उद्वृत्रहन्वाजिनांवाजिनान्युद्रथानांजयतांयंतुघोषाः ॥ अस्माकमिंद्रःसमृतेषुध्वजेष्वस्माकंयाइषवस्तजयंतु ॥ अस्माकंवीराउत्तरेभवंत्वस्माँउदेवाअवताहवेषु ॥ अमीषांचित्तंप्रतिलोभयंतीगृहाणांगान्यप्वेपरेहि ॥ अभिप्रेहिनिर्दहहृत्सुशोकैरंधेनामित्रास्तमसासचंतां ॥ प्रेताजयतानरइंद्रोवःशर्मयच्छतु ॥ उग्रावःसंतुबाहवोनाधृष्यायथासथ ॥ १२ ॥ असौयासेनामरुतःपरेषाम

ते ॥ १८ ॥ गणानांत्वागणपतिंहवामहेकविंकवीनामुपमश्रवस्तमं ॥ ज्येष्ठराजंब्रह्मणांब्रह्मणस्पतआनःशृण्वन्नूतिभिःसीदसादनं ॥ जातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः ॥ सनःपर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः ॥ क्षेत्रस्यपतिनावयंहितेनेवजयामसि ॥ गामश्वंपोषयित्न्वासनोमृळातीदृशे ॥ वास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वावेशोअनमीवोभवानः ॥ यत्त्वेमहेप्रतितन्नोजुषस्वशंनोभवद्विपदेशंचतुष्पदे ॥ वास्तोष्पतेप्रतरणोनएधिगयस्फानोगोभिरश्वेभिरिंदो ॥ अजरासस्तेसख्येस्यामपितेवपुत्रान्प्रतिनोजुषस्व ॥ वास्तोष्पतेशग्मयासंसदातेसक्षीमहिरण्वयागातुमत्या ॥ पाहिक्षेमउतयोगेवरंनोयूयंपातस्वस्तिभिःसदानः ॥ अमीवहावास्तोष्पतेविश्वारूपाण्याविशन् ॥ सखासुशेवएधिनः ॥ १९ ॥ स्वप्नस्वप्नाधिकरणेसर्वंनिष्वापयाजिनं ॥ आसूर्यमन्यात्स्वापयव्द्यु ऽळंहंजाग्रियादहं ॥ अजंग

रोनामसर्पःसर्पिरविषोमहान् ॥ तस्मिन्हिसर्पःसुधितस्तेनंत्वास्वापयामसि ॥ सर्पसर्पोअजगरःसर्पिरविषोमहान् ॥ यस्यशुष्कात्सिंधवःस्तस्यंगधमंशीमहि ॥ कालिकोनामसर्पोनवनागसहस्रबलः ॥ यमुनन्हदेहसोजातोः योनारायणवाहनः ॥ यदिकालिकंदूतस्ययदिकाःकालिकाद्भयात् ॥ जन्मंभूमिमंतिक्रांतोनिर्विषौयातिकालिंकः ॥ आयाहींद्रपथिभिरीळितेभिर्यज्ञमिमन्नोभागधेयंजुषस्व ॥ तृप्तांजंहुर्मातुंळस्येवयोषांभागस्तेपैतृंष्वसेयींवपामिंव ॥ यशस्करंबलंवंतंप्रभुत्वंतमेवराजाधिपतिर्बभूव ॥ संकीर्णनागाश्वपतिर्नराणांसुमंगल्यंसततंदीर्घमायुः ॥ कर्कोटकोनामसर्पोयोदृष्टीविषउच्यंते ॥ यस्यंसर्पस्यंसर्पत्वंतस्मैसर्पनमोस्तुंते ॥ अतिंकालिकरौद्रस्यविष्णुसौम्येनभामिनि ॥ यमुनन्नादिकालिकंतेविष्णुस्तोत्रमनुस्मरंन् ॥ २० ॥ माबिंभेनमंरिष्यासिपरित्वापामिसर्वतः ॥ घनेनहंनिद्धाश्चिकमहंदंडेनागंतं ॥ आदित्यरथवेगेनविष्णोर्बाहुबलेनंच ॥ गरुडपक्षनिपातेनभूमिंगच्छमहायशाः ॥ गरुडस्यजातंमात्रेणत्रयोलोकाःप्रकंपिताः ॥ प्रकंपितामहीसर्वाःसशैलंवनकाननं ॥ गगंनंनष्टंचंद्रार्कज्योतिषंनप्रकाशंते ॥ देवताभयंभित्रातामारुतौनप्लवायंतिमारुतौनप्लवायत्योंनमः ॥ भोसर्पभद्रभद्रंतेदूरंगच्छमहायंशाः ॥ जन्मेजयस्यंयज्ञांतेआस्तीकंवचनंस्मंर ॥ आस्तीकवचनंश्रुत्वायःसर्पौननिवर्तंते ॥ शतधांभिद्यंतेमूर्ध्निःशिंशवृंक्षफलंयथा ॥ अगंस्त्यंमाधवंचैवमुचुकुंदोमहामुनिः ॥ कपिंलोमुनिरास्तीकःपंचैतेसुखशायिंनाः ॥ नर्मदायैनंमःप्रातर्नर्मदायैनमोनिंशि ॥ नमोस्तुनर्मदेतुभ्यंत्राहिमांविषसर्पतः ॥ योजरत्कारुणाजातोजरत्कंन्यांमहायंशाः ॥ तस्यसर्पापभद्रंतेदूरंगच्छमहायंशाः ॥ तस्यसर्पस्यंसर्पत्वंतस्मैसंर्पनमोस्तुते ॥ २१ ॥ आकृष्णेनरजंसावर्तमानोनिवेशयंन्नमृतंमर्त्यंच ॥ हिरण्ययेनसवि-

तारथे॒नादे॒वोया॑ति॒भुव॑नानि॒पश्य॑न् ॥ आप्या॑यस्व॒समे॑तुतेवि॒श्वतः॑सोम॒वृष्ण्यं॑ ॥ भवा॒वाज॑स्यसंग॒थे ॥ अ॒ग्निर्मू॒र्धादि॒वःक॒कुत्पतिः॑पृथि॒व्याऽअ॒य ॥ अ॒पांरेतां॑सिजिन्वति ॥ उद्बु॑ध्यध्वंसम॑नसःसखायः॒सम॒ग्निमिं॑ध्वंब॒ह॒वः॑सनी॑ळाः ॥ द॒धि॒क्राम॒ग्निमु॒षसं॑चदे॒वीमिंद्रा॑व॒तोव॑से॒निह्व॑येवः ॥ बृह॑स्पते॒अति॒यद॒र्योअर्हा॑द्द्युमाद्वि॒भाति॒क्रतु॑म॒ज्जने॑षु ॥ याद्दी॒दय॒च्छव॑सऋतप्रजात॒तद॒स्मासु॒द्रवि॑णंधेहिचि॒त्रं ॥ शु॒क्रःशु॑शुक्वाँउ॒षोनज॒रःप॒प्रासं॒मीचीदि॒वोनज्योतिः॑ ॥ शम॒ग्निर॒ग्निभिः॑कर॒च्छंन॑स्तपतु॒सूर्यः॑ ॥ शंवातो॑वात्वर॒पाअप॒स्रिधः॑ ॥ कया॑नश्चि॒त्रआभु॑वदू॒तीस॒दावृ॑धः॒सखा॑ ॥ कया॒शचि॑ष्ठयावृ॒ता ॥ के॒तुंकृ॒ण्वन्न॑के॒तवे॒पेशो॑मर्याअपे॒शसे॑ ॥ सम॒षद्भि॑रजायथाः ॥ २२ ॥ मुंचामि॑त्वाह॒विषा॒जीव॑नाय॒कम॑ज्ञातय॒क्ष्मादु॒तरा॑ज॒यक्ष्मात् ॥ ग्राहि॑र्ज॒ग्राह॒यदि॑वै॒तदे॑नं॒तस्या॑इंद्रा॑ग्नि॒प्रमु॑मुक्तमेनं ॥ यदि॑क्षि॒तायु॒र्यदि॑वा॒परे॑तो॒यदी॑मृ॒त्योरं॑ति॒कन्नी॑तए॒व ॥ त॒माह॑रामि॒निर्ऋ॑तेरु॒पस्था॒दस्पा॑र्षमेनंश॒तशा॑रदाय ॥ स॒ह॒स्रा॒क्षेण॑श॒तशा॑रदेनश॒तायु॑षाह॒विषाहा॑र्षमेनं ॥ श॒तंय॑थे॒मंश॒रदो॒नयाती॑न्द्रो॒विश्व॑स्यदुरि॒तस्य॑पा॒रं ॥ श॒तंजी॑वश॒रदो॒वर्ध॑मानःश॒तंहे॑मं॒तांछ॒तमु॑वसं॒तान् ॥ श॒तमिं॑द्रा॒ग्निसं॑वि॒ताबृह॒स्पतिः॑श॒तायु॑षाह॒विषे॒मंपुन॑र्दुः ॥ अहा॑र्ष॒त्वावि॑दंत्वा॒पुन॒रागाः॑पुन॑र्नवः ॥ सर्वां॑ग॒सर्वं॑ते॒चक्षुः॒सर्व॒मायु॑श्चतेवि॒दं ॥ २३ ॥ त्यमू॒षुवा॒जिनं॑दे॒वजू॑तंस॒हावा॑नंतरु॒तारं॒रथा॑नां ॥ अरि॑ष्टनेमिंपृत॒नाज॑मा॒शुंस्व॒स्तये॒तार्क्ष्यं॑मि॒हाहु॑वेम ॥ इंद्र॑स्येवरा॒तिमा॒जोहु॑वानाःस्व॒स्तये॒नाव॑मि॒वारु॑हेम ॥ उ॒र्वीन॒पृथ्वी॒बहु॑ले॒ग॒भीरे॒मावा॒मेतौ॒मापरे॑तौरिषाम ॥ स॒द्यश्चि॒द्यःशव॑सा॒पंच॑कृ॒ष्टीःसूर्य॑इव॒ज्योति॑षा॒पस्त॒तान॑ ॥ स॒ह॒स्र॒साःश॑त॒साअ॑स्य॒रंहि॒र्नस्मा॑वरंतेयुव॒तिंनशर्या॑ ॥ २४ ॥ महि॑त्री॒णामवो॑स्तुद्यु॒क्षंमि॒त्रस्या॑र्य॒म्णः ॥ दु॒राधर्षं॒वरु॑णस्य ॥ न॒हितेषां॑मम॒चन॒नाध्वं॑सुवा॒रणे॑षु ॥ ईशे॑रि॒पुर॒घशं॑सः ॥ यस्मैं॑पु॒त्रासो॒आदि॑तेः॒प्र-

जीवसेमर्त्याय ॥ ज्योतिर्यच्छंत्यजस्रं ॥ तच्छंयोरावृणीमहेगातुंयज्ञायगातुंयज्ञपतयेदैवीस्वस्तिरस्तुनस्वस्तिर्मानुषेभ्यः ॥ ऊर्ध्वंजिगातुभेषजं ॥ शन्नोअस्तुद्विपदेशंचतुष्पदे ॥ ॐनमोब्रह्मणेनमोअस्त्वग्नयेनमःपृथिव्यैनमओषधीभ्यः ॥ नमोवाचेनमोवाचस्पतयेनमोविष्णवेमहतेकरोमि ॥ ३ ॥ शांतापृथिवीशिवमंतरिक्षंद्यौर्नोदेव्यभयंनोअस्तु ॥ शिवादिशःप्रदिशंउद्दिशोनआपोविद्युतःपरिपांतुसर्वतःशांतिःशांतिःशांतिः ॥ ॐचरितंरघुनाथस्यशतकोटिप्रविस्तरं ॥ एकैकमक्षरंपुंसांमहापातकनाशनं ॥ १ ॥ श्लोक ॥ २५ ॥ तमर्वंतंनसानसिमरुषंनदिवःशिशुं ॥ मर्मृज्यंतेदिवेदिवे ॥ बोधयन्माहरिभ्यांकुमारःसांहदेव्यः ॥ अच्छानहूतउदरं ॥ उतत्यायंजताहरीकुमारात्सांहदेव्यात् ॥ प्रयंतासद्यआददे ॥ एषवांदेवावश्विनाकुमारःसांहदेव्यः ॥ दीर्घायुरस्तुसोमकः ॥ तंयुवंदेवावश्विनाकुमारंसांहदेव्यं ॥ दीर्घायुषंकृणोतन ॥२६॥ सहस्राक्षेणशतशारदेनशतायुषाहविषाहार्षमेनं ॥ शतंयथेमंशरदोनयातींद्रोविश्वस्यदुरितस्यपारं ॥ शतंजीवशरदोवर्धमनःशतंहेमंतांच्छतमुवसंतान् ॥ शतमिंद्राग्नीसविताबृहस्पतिःशतायुषाहविषेमंपुनर्दुः ॥ आहार्षंत्वाविदंत्वापुनरागाःपुनर्नव ॥ सर्वांगसर्वंतेचक्षुःसर्वमायुश्चतेविदं ॥ सहस्रमाख्यात्रेदद्याच्छतंप्रतिगरित्रएतेचैवासनेश्वेतश्वाश्वतरीरथोहोतुःपुत्रकामाहाप्याख्यापयेरन्लभंतेहपुत्रान्लभंतेहपुत्रान् ॥ श्रीवर्चस्वमायुष्यमारोग्यमाविधाच्छुभमानंमहीयते ॥ धान्यंधनंपशुंबहुपुत्रलाभंशतसंवत्सरंदीर्घमायुः ॥ सूतिकाबालकयोःआयुष्याभिवृद्धिरस्तु ॥ दीर्घमायुष्यमस्तु

॥ इतिशांतिपाठसमाप्तः ॥ छ ॥ छ ॥ छ ॥

॥९२॥ ॥ अथपवमानपंचसूक्तप्रारंभः ॥ श्रीगणेशायनमः ॥ श्रीगुरुभ्योनमः ॥ यस्यवाक्यंसऋषिर्यातेनोच्यतेसादेवतायदक्षरपरिमाणंतच्छंदः

प० १७७

सू०

॥ श्रीपरमेश्वरप्रीत्यर्थंपौरुषपावमानादिपंचसूक्तपठनेविनियोगः ॥ हरिः ॐसहस्रंशीर्षापुरुषःसहस्राक्षःसहस्रंपात् ॥ सभूमिंविश्वतोवृत्वात्यतिष्ठदशांगुलं ॥ पुरुषएवेदंसर्वंयद्भूतंयच्चभव्यं ॥ उतामृतत्वस्येशानोयदन्नेनातिरोहति ॥ एतावानस्यमहिमातोज्यायांश्चपूरुषः ॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवि ॥ त्रिपादूर्ध्वऽउदैत्पुरुषःपादोस्येहाभवत्पुनः ॥ ततोविष्वङ्व्यक्रामत्साशनानशनेअभि ॥ तस्माद्विराळजायतविराजोअधिपूरुषः ॥ सजातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥ १ ॥ यत्पुरुषेणहविषादेवायज्ञमतन्वत ॥ वसंतोऽअस्यासीदाज्यंग्रीष्मइध्मःशरद्धविः ॥ तंयज्ञंबर्हिषिप्रौक्षन्पुरुषंजातमग्रतः ॥ तेनदेवाऽअयजंतसाध्याऋषयश्चये ॥ तस्माद्यज्ञात्सर्वहुतःसंभृतंपृषदाज्यं ॥ पशूंतांश्चक्रेवायव्यानारण्यान्ग्राम्याश्चये ॥ तस्माद्यज्ञात्सर्वहुतऋचःसामानिजज्ञिरे ॥ छंदांसिजज्ञिरेतस्माद्यजुस्तस्मा

१७७

```
[OrderDescription]
,CREATED=13.09.19 15:29
,TRANSFERRED=2019/09/13 at 15:35:20
,PAGES=10
,TYPE=STD
,NAME=S0001781
,Book Name=M-2243-SHANTIPATH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,
```